भावे पौत्रस्य तस्याप्यभावे प्रपौत्रस्य च दायभागत्वमिति दर्शयितुं । तच्चाग्रे स्पष्टीकरिष्य
ते । पुत्रपौत्रप्रपौत्राभावे दौहित्रस्य तत्कार्यकारितामाह ॥ पौत्रदौहित्रयोर्लोके विशेषो नोप
पद्यते । दौहित्रोऽपि ह्यमुत्रैनं संतारयति पौत्रवत् ॥ ६८ पौत्रदौहित्रयोरिहलोके विशेषसत्त्वेऽपि
परलोकविशेषो नास्ति तुल्योपकारजनकत्वात् । तमेव दर्शयति । यतः पौत्रवद्दौहित्रोऽपि
पुत्रं मातामहं संतारयति ॥ नरकादुद्धरत्येव । अस्य च दायभागप्रकरणे पिंडप्रस्तावेऽ
भिधानं पुत्रपौत्राद्यभावे दौहित्रस्य धनसंबंधं पिंडसंबंधं च प्रतिपादयितुं । तथा च स्म
त्यंतरे ॥ अपुत्रपौत्रसंताने दौहित्रो धनमाप्नुयात् ॥ पूर्वेषां तु स्वधाकारे पौत्रदौहित्रकाः समा
इति ॥ इदं च पुत्रिकापुत्रत्वेनापुत्रत्वव्यपदेशाविरोधाभावात्तस्मादपुत्रीकृतदुहितृसुतस्या
पि मातामहधनसंबंधोऽस्तीत्यनेन [illegible] । अत एव मनुः । अकृता वा कृता वापि यं विंदेत्स

द्दशात्स्मृतेः॥ पौत्रो मातामहस्तेन दद्यात्पिंडं हरेद्धनं इति मनुः भयपदुहितृसुतस्य मातामहधन
संबंधेन दर्शयति॥ स च पुत्रीकृतभाव इति वक्ष्यते। इति श्रीमन्महाराजाधिराज श्रीव
सिष्ठवंशावतंश श्रीकांडपनाथकात्मज श्रीतम्मणनायकापरनामधेय श्रीकेशवनाय
क प्रोत्साहित श्रीवाराणसीवासि धर्माधिकारि श्रीरामपंडितात्मज श्रीनंदपंडितकृ
तौ विष्णुस्मृतिटीकायां श्रीमद्वैजयंत्यां पंचदशोऽध्यायः॥१५॥ एवं मुख्यगौणसुता
न्विभज्य गौणानां दर्शिताः सांप्रतं बोद्धव्या अपि मुख्यस्य सुतात्सदं तरमेदं च संक्षिपति।
समानवर्णा सपुत्राः सवर्णा भवंति॥ भर्तृवेश्मपा समानवर्णासु इत्युपलक्षणं तेन
प्रशस्तद्विजाहोताऽस्त्वतपोनिष्ठमनार्षगोत्रास्व सपिंडासु वरीयसां पुत्राणां मतो पु १
त्वेत्य पिंडुष्टयं। तासु भर्त्रा जनिताः पुत्राः मातापितृसमानवर्णा भवंति॥ यथाह बौधायनः। १६२

स्तानार्यस्य विवाहनगुरेसै ; संस्कृतामुत्पन्नास्तज्जातीया भवंति नान्य इति ॥ एतान्
ब्राह्मणादीन् चतुरः आर्यस्य त्रैवर्णिकस्य । आर्ये गृहस्ता शूद्रस्य विवाहात् तेष्वयामपि
जातस्य सवर्णत्वं भवति ॥ नत्वनूढायां । मनुरप्याह सर्वेवर्णेषु तुल्यासु पत्नीष्वक्षतयोनि
षु । आनुलोम्येन संभूता जात्या ज्ञेयास्त एव ते ॥ आनुलोम्यं च वीजस्य कन्यायाः न तु वर्णत
लोम्यं तस्य जात्यंतरापादकत्वात् । तेन वराद्यायस्यामुत्पन्नस्य न वर्णानेति । सगोत्राद्विष
उत्पन्नस्तत्वमेव स्यपर्यते । आहू चापतितापत्यं ब्राह्मण्यां पत्थु शूद्रजः । सगोत्रोढासुतश्चैव
चंडालास्त्रय ईरिता इति ॥ आत्मनीतीं च भ्रातृजो लोनायच पतीति वाग्जायापि भ्रातुः कृतत्वेन
तदभावे होमभूगुरुत्वेन संस्कारमुत्पन्नेरावश्यकं ॥ न च भ्रातृस्वाणीयेन तत्सायुज्यं । तस्मा
यां भवत्येवैव्यापत्ताद्वस्यात् ॥ एतेन कानीन सहोढपौनर्भवकुंडगोलका

२ नामसवर्णत्वमुक्तं भवति॥ ब्राह्मणत्वादि जातेः शास्त्रैकसमधिगम्यत्वात्। अन्यथा
जातिविवेकशास्त्रानर्थक्यापातात्॥ न चाभिव्यंजकनिरूपणमापतति॥ तावता च लौकिक
त्वसिद्धेः पूर्वाहुतीयत्वादिवत्॥ न चैवं जन्यजनकाभावे स्वाभिव्यंजकः सद्यमानप्रत्यक्ष
स्यैवेति वाच्यं तादृग्मात्रस्याति प्रसक्तत्वेन जनकत्वे(ऽ)पि ब्राह्मणत्वादिविशेषणतामुपग
मात्॥ तथा च मातुरप्यप्रत्यक्षत्वं। श्रीसंतानापि शब्देन प्रत्यक्षाधीनत्वानुपपत्तेस्तस्यापि
त्रत्वकृत्वा सिद्धेः॥ एवं च स्त्रिपरः स्वतंतिः पुरुषजातिर्गोत्वादिवन्न प्रत्यक्षा तदा कथमविवस्व
पुत्रजातिः प्रत्यक्षा स्यात्। तस्मात्तु ब्राह्मणत्वमलौकिकं लौकिकाच्च क्रियासाधनत्वाभावा
द्गृहत्वमौपादिवद्विस्पष्टमानादेर्वा लौकिकं तन्न॥ यच्चपिगमने भोजनादिकारित्वं ब्राह्मणा
स्याप्यस्ति तथापि न ब्राह्मणतापुरस्कारेण किंतु प्राणित्वादिनैव तादृशेनात्तलौकिका

क्रियायामेव साधुभक्त्या यत्रापि ब्राह्मणाः क्षतं कुर्याद् इत्यादि दुष्टतानादेश्यपदेशु ब्राह्म
णामेवं डे प्रयोजकं। तत्राप्यवर्थपदेन तान्निवर्त्तते। इत्येवं दनिष्कान्तं वंश्यी। स्वार्थत्वा
त्। नवदंडनमर्थवती। क्रियादेशमप्रवर्तनात्। अनिष्ठन्ति रिक्तानुसर्वोपिष्ट। क्रियासामान्य
विधिनार्थवमेवते। तेन कोप्यसिद्धः। अतएव च विशिष्टः। प्रकृति विशेषं चातुर्वर्ण्य
संस्कार विशेषा वित्पुत्रो ब्राह्मणोस्यमुखमासीदित्यपि निगमो भवतीत्याह। एवं चतुर्व
र्ण्याद्युत्पत्तिमपंचेन। विश्वेश्वरस्तु मिताक्षराटीकायां प्रमिताक्षरायां सम्यक्कृत
वानवगंतव्यः। सवर्णापदव्याख्यामाह। अनुलोमास्तु मातृसवर्णाः। २। आसमस्तपादेना
नुलोमाः क्षत्रियादयस्ता अनुलोम्येभ्यो जाताः मातृसवर्णाः पुत्रा भवंति। मातृसवर्णत्वं तत्त
द्वर्णधर्मप्राप्त्यै॥ ब्राह्मणेन क्षत्रियायामुत्पादितः क्षत्रिय एव क्षत्रियेण वैश्यायां

वैश्य एव वैश्यायां शूद्रायां शूद्र एवेति संकरस्मरणात् ॥ ननु तर्हि तद्वर्णप्राप्त्येजा
त्यंतरस्मरणात् । यथाह योगीश्वरः । विप्रान्मूर्द्धावसिक्तो हि क्षत्रियायां विशः
स्त्रियां ॥ अंबष्ठः शूद्र्यां निषादो जातः पारशवोऽपि वा ॥ वैश्याशूद्रोस्तु राजन्यान्मा
हिष्योग्रौ सुतौ स्मृतौ ॥ वैश्यात्तु करणः शूद्र्यां विन्नास्वेष विधिः स्मृत इति । गौतमस्त्व
न्यथाह । अनुलोमानंतरैकांतरद्व्यंतरप्रसूजाताः सवर्णांबष्ठोग्रनिषाददौष्यंतपारस
वा इति । अस्यार्थः । ब्राह्मणस्यानंतरा क्षत्रिया तस्यां तस्मात्सवर्णः क्षत्रियस्य वैश्या
तस्यां तस्माद्दौष्यंतः । ब्राह्मणस्य द्व्यंतरा शूद्रा तस्यां तस्मात्पारसव इति । एता
भ्यां योगीगौतमवचनाभ्यां ब्राह्मणादिभ्यः क्षत्रियाद्युपजातानां संज्ञाविशे ३
षोऽभिहितः । स यथा मूर्द्धावसिक्तः सवर्णो । अंबष्ठ निषाद मल्ल कंठऽनिषादपा १४

रसंभैरमाहिष्यावष्टौ।उग्रदौष्यंत यवनाः करणेणौ ग्रौवेति॥अस्मादेव वच नेरूत्यान्नू॰
लेसंस्थानामेश्वानमितिनन्यनत्वं।अनुलोमानामपिपित सवर्णात्वंक न्वेदाहयोगी
श्वरः।जात्युत्कर्षो युगे दपः सप्तमे पंचमे पिवा।अत्यये करणां सप्मं पूर्वच्चाधरोत्तर
म॥इति।जातयोमूर्द्धावसिक्ताद्यास्तासामुत्कर्षो ब्राह्मणत्वादि वर्णप्राप्तिः सा
सप्तमे अपि वक्तातो पंचमे वायुगे दंपवस्त्रीपुंसयोर्भवति।यथा ब्राह्मणेन शूद्रायां
मुत्पादिता निषादी सा ब्राह्मणेन [illegible] कन्यां जनयति सापि ब्राह्मणेन [illegible] कन्यात
रमित्येवं सप्तमी शुद्धमष्टमं ब्राह्मणं जनयति।एवमेव षष्ठी षष्ठीसप्तममेवं मूर्द्धा
वसिक्ता पंचमी षष्ठमेवमन्यत्रापि।तथा भूरवत्या जीवन ब्राह्मणोपं जनयति
सोप्येत पारशवा [illegible] छमाः।श्रद्ध एव भवति॥

एवं वैश्यपत्न्यां षष्ठे द्वंद्वे सप्तमो वैश्यः एवं क्षत्रियपत्न्यां पंचमे द्वंद्वे षष्ठः क्षत्रि
य इति। तथा शूद्रीवासिष्ठः क्षत्रियायां पुत्रं जनयति सोपि क्षत्रियायां पुत्रांतरमित्ये
वं पंचमे द्वंद्वे षष्ठः क्षत्रियः। एवमंबष्ठो वैश्यां शूद्रां षष्ठे द्वंद्वे सप्तमं वैश्यं। एवं
निषादः शूद्रामुद्वाह्य सप्तमे द्वंद्वे षष्ठमशूद्रमेवेत्यपि ज्ञेयं॥ वर्णांतरमनमुत्कर्षापक
र्षाभ्यां सप्तमेन पंचमेन वा वापी इति गौतमस्मरणात्। तस्येव मात्व पर्यंतरमाह प्रति
लोमास्त्वार्य विगर्हिता॥ शूद्रादिना प्रतिलोमा वैश्यादेपरस्तासु तेभ्यो जाता आर्यवि
गर्हिताः सेवार्दीवधाद्याः शूद्रसधर्माणः इत्यर्थः। अनेनानुलोमजानां द्विजधर्मत्व ८
मुक्तं। यथाह मनुः। सजातिजानंतरजा जाः क्रानीनाद्दीनन्पर्श्वे शूद्रधर्मत्वमुक्तमेव।
गौतमस्तु शूद्रायामनुलोमजं सप्ताप्यधर्मत्वमाह (प्रतिलोमास्तु) षट्सुता द्विजधर्मिणः।
१६५

शूद्राणां तु सधर्माणः सर्वेऽपध्वंसजाः स्मृता इति। अपध्वंसो व्यभिचारः॥
तेन कानीनादेः कन्यायामपि शूद्रधर्मत्वमेव। गोतमस्तु शूद्रायामनुलोमजं स्या
त्सधर्मत्वमाह। प्रतिलोमास्तु धर्महीनाः शूद्रायां चेति। प्रतिलोमजेष्वपि विशेषंस
स्वाह। असमानायां तु शूद्रात्पतितवृत्तिरिति। असमानायां वैश्यादिस्त्रियां। शूद्रो
त्पन्नः। आयोगवादिः पतित इव भवति। एतेन वैश्यायुत्पन्नस्य प्रतिलोमजस्यानपति
तवृत्तेरपि तु शूद्रसधर्मत्वमेवेति। तामेव संज्ञापूर्वकं दर्शयति। तत्र वैश्यापुत्रः शूद्रे
णायोगवः। ४। तत्र च स्वाप्रतिलोमजानां मध्ये शूद्रेण वैश्यायामुत्पन्नः पुत्र आ
योगवसंज्ञो भवति। पुल्कसमागधौ क्षत्रियापुत्रौ वैश्यशूद्राभ्यां। क्षत्रियायां
वैश्यादुत्पन्नः पुल्कसः। मागध इति चाण्डालोऽवर इति वा शूद्रादुत्पन्नस्तुऽत्तो

वैश्यादुत्पन्नो वैदेहकः मागधो वैदेह इति वा पुल्कस इति। क्षत्तेति वा। चंडा
लवैदेहकं सूता ब्राह्मणीपुत्राः शूद्रविट्क्षत्रियाः ६ ब्राह्मण्यां शूद्रादुत्पन्नश्चंडा
५ लो वैश्यादुत्पन्नो वैदेहिकः। क्षत्तेति वा। मागध इति। अस्यार्थः अनंतरैकांतरद्व्यंत
रासु जातो ह्यनुवर्त्तते तेन क्षत्रियस्यानंतरा ब्राह्मणी तस्यां। तस्यां तु क्षत्ता। शूद्र
स्य क्षत्रिया तस्यां तस्माद्वैदेहकः। शूद्रस्य द्व्यंतरा ब्राह्मणी तस्यां तस्माच्चंडाल इति। न
तांतरेषु स एव सवर्णानुलोमप्रतिलोमजातासंस्थानंतरमाह। ब्राह्मण्यां क्षत्रियान्
र्तेभ्य आनुपूर्व्याद्ब्राह्मणः सूतमागधचंडालान्। तेभ्य एव क्षत्रियामूर्द्धाव
सिक्तक्षत्रियाधीवरपुल्कसान्। तेभ्य एव वैश्या भृज्जकंटमाहिष्यवैश्यवैदेहकान्। पार
सवयवनकरणाच्छूद्रान् कथ्यक इति। आनुपूर्वेण व्यतिक्रमोनत्वानुलोमायोगोश्च
रोधि। ब्राह्मण्यां क्षत्रियात्सूतो वैश्याद्वैदेहिकस्तथा। शूद्राज्जातस्तु चांडालाः १६

सर्वधर्मबहिष्कृताः॥ क्षत्रियामागधं वैश्यात् शूद्रात्क्षत्तारमेव च॥ शूद्रादयोगवं वै
श्याजनयामास वै सुतम्॥ इति॥ वर्णसंकरवत्संकीर्णसंकरा अथाभयेपास्तदन
भिधानेनैनेमित्रमाह। संकरसंकरश्च संख्येयाः॥ संकरेष्वनुलोमजेषु प्रतिलोमजे
षु च वर्णेभ्यः पुनरनुलोम्येन प्रातिलोम्येन च जातास्ते संकरसंकरास्तथा संकरा
णामनुलोमजानां प्रतिलोमानां चानुलोम्येन प्रातिलोम्येन च परस्परं ये संकरास्ते
असंख्येयाः। अनंतत्वात्। यथाह मनुः। ब्राह्मणादुग्रकन्यायामावृतो नाम जायते।
आभीरोंबष्ठकन्यायामायोगव्यां तु धिग्वणः॥ जातो निषादाच्छूद्रायां जात्या भवति पुल्क
सः। शूद्राज्जातो निषाद्यां तु स वै कुक्कुटकः स्मृतः। क्षत्तुर्जातस्तथोग्रायां श्वपाक इ
ति कीर्त्यते। वैदेहकेन त्वंबष्ठ्यामुत्पन्नो वेणुरुच्यते। इत्यादि मानवं। एवमनुसंधेयं॥

तेषामप्यानुलोम्यप्रातिलोम्याभ्यामुत्पत्तावुत्कर्षापकर्षौ ज्ञेयौ ॰ पूर्वं चत्वाधरोत्तरम्
इति योगीश्वरस्मरणात् । प्रतिलोमजानां च तेषां ह । रंगावतरणमायोगवानां चारंगावतर
णामधुना विद्यानृत्यशिक्षा च सायोगवानां च तिस्र क्षि त्वष्टिस्त्वायोगवस्य चेति मनुः
त्वष्टिः काष्ठादितक्षणं ।। यथाह मनुः । मेदान्ध्रचुंचुमद्गूनामरण्य । मा धत्तक्षपुक्कसा
नां । एवमत्यन्ता आरण्यपशुहिंसनं । पुक्कसानामिति तत्समानधर्माणामन्येषाम
प्युपलक्षणं । यथाह मनुः । मेदान्ध्रचुंचुमद्गूनामारण्यपशुहिंसनम् । क्षत्तुग्रपुक्कसानां
च बिलौकोवधबन्धनमिति । निषादादिषु स्वकार्यकरणे अमकार विशेषः । आराव
सर्वावैदेहान्मेदो निषाद्यामजनः ब्राह्मणाद्वैदेह्यां जात अम्बष्ठ्यांस्त्रियां जातो मनुः ।
क्षत्रियेणाशूद्रायां जातो वैदेहिति केशापनोदनं वैदेहितस्यां स्तुतिक्रियामागधानां १०

स्तुतिक्रियासहस्रसद्गुणकीर्तनं मागधानां वृत्तिः। मागधानां वणिक्पथमिति म
नुः॥ वणिक्कर्मयो वाणिज्यं॥ वध्यं जातित्वं चंडालानां॥१॥ वध्यानां चोरा
दीनां घातनं चांडालानां वृत्तिः। वधूवचनात् श्वपचानां चाप्याह मनुः। चंडा
लश्वपचानां वेत्सुपकर्म्यमूषां ध्वंशावेव निर्हरेपुरिति स्मृतिः। वध्यांश्च
हन्युः सततं यथाशास्त्रं नृपाज्ञया वध्यवासांसि गृह्णीयुः शय्याश्चाभरणानि
चेति। स्त्रीरक्षा तज्जावनं वैदेहकानां॥१२॥ स्त्रीरतानर्तकादीनां रक्षापो
परातादिजीवनं तदुपार्जितद्रव्यजीवनं च वैदेहकानां वृत्तिः। तेतः।

२६५ पुरक्षेतन्ये। अश्वसारथ्यं सूतानां ॥२॥ अम्बष्ठानां दमनयोजनादि शालिहो
त्रसानं रथसारथ्यं च सूतानां वृत्तिः। चंडालेषु विशेषमाह। चंडालानां बहिर्ग्राम
निवसनं मृतचेलधारणमिति प्रतिलोमजानां मध्ये चंडालादीनां विशे
षः॥ विशेषग्रहणात्तद्भिन्नभांड भोजनादयोऽन्ये धर्मा अभ्यनुसा
पन्ते॥ यथाह मनुः। चंडालश्वपचानां तु बहिर्ग्रामात् प्रतिश्रयः
कारावरो निषादात्तु चर्मकारः प्रजायते। वैदेहकांध्रमेदौ च बहिर्ग्रामप्र॥ २६